Roll No.
रोल नं

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| | | | | | | | |

**Code No. 102**

Candidates must write the Code on the title page of the answer-book.

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख पृष्ठ पर अवश्य लिखें।

# भारतीय शिक्षा बोर्ड
## आदर्श प्रश्नपत्रम् (वर्ष २०२६-२७)
## कक्षा – १२ संस्कृतम् (SANSKRIT)

General Instructions:
सामान्य निर्देश :

Read the following instructions very carefully and strictly follow them:
निम्नलिखित निर्देशों को ध्यान से पढ़ें एवं पूर्णरूप से उनका अनुपालन करें।

Time allowed: 3 hours
निर्धारितः समय : होरात्रयम्

Maximum marks: 80
अधिकतमाङ्काः 80

Note/नोट :

(i) Please check that this question paper contains 10 printed pages.
कृपया जाँच कर लें कि इस प्रश्न-पत्र में 10 मुद्रित पृष्ठ हैं।

(ii) Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
प्रश्न-पत्र में दाहिनी ओर दिए गये कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख पृष्ठ पर लिखें।

(iii) Please check that this question paper contains 14 questions.
कृपया जाँच कर लें कि इस प्रश्न-पत्र में 14 प्रश्न हैं।

(iv) Please write down the Serial Number of the question in the answer-book before attempting it.
कृपया प्रश्न के उत्तर लिखना आरम्भ करने से पहले, उत्तर-पुस्तिका में प्रश्नों के क्रमाङ्क अवश्य लिखें।

(v) 15 minutes time has been allotted to read this question paper. The question paper distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.
इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है। प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जायेगा। पूर्वाह्न में 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका में कोई उत्तर नहीं लिखेंगे।

(vi) All questions are compulsory.
सभी प्रश्न अनिवार्य हैं।

**Part A/खण्ड: क**

(vii) Question No. 1 is an optional question. **5 marks** allotted for this. Choose the correct option.
प्रश्न संख्या 1 विकल्पात्मक प्रश्न है। इसके 5 अङ्क निर्धारित हैं। सही विकल्प को चुनें।

(viii) Question No. 2 carry **5 marks**,
Q. No. 3 carry **5 marks** and
Q. No. 4 carry **5 marks**.
Q. No. 5 carry **10 marks**,
Q. No. 6 carry **20 marks**.
प्रश्न संख्या 2 के लिए 5 अङ्क,
प्रश्न संख्या 3 के लिए 5 अङ्क तथा
प्रश्न संख्या 4 के लिए 5 अङ्क निर्धारित हैं।
प्रश्न संख्या 5 के लिए 10 अङ्क,
प्रश्न संख्या 6 के लिए 20 अङ्क निर्धारित हैं।

**Part- B/खण्ड: ख**

(ix) Q. No. 7 carry **5 marks**,
Q. No. 8 carry **4 marks**,
Q. No. 9 carry **4 marks**,
Q. No. 10 carry **4 marks**,
Q. No. 11 carry **4 marks**,
Q. No. 12 carry **3 marks**,
Q. No. 13 carry **4 marks** and
Q. No. 14 carry **2 marks**.
प्रश्न संख्या 7 के लिए 5 अङ्क,
प्रश्न संख्या 8 के लिए 4 अङ्क,
प्रश्न संख्या 9 के लिए 4 अङ्क,
प्रश्न संख्या 10 के लिए 4 अङ्क,
प्रश्न संख्या 11 के लिए 4 अङ्क,
प्रश्न संख्या 12 के लिए 3 अङ्क,
प्रश्न संख्या 13 के लिए 4 अङ्क तथा
प्रश्न संख्या 14 के लिए 2 अङ्क निर्धारित हैं।

## खण्ड:- 'क' Section- 'A' ५० अङ्का:

१. अधोलिखितानां प्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत - (केवलं, पञ्चानामेव) 5×1=5

(i) "विभाषा स्वसृपत्योः" अत्र स्वसृपत्योः' शब्दे विभक्तिवचनं किम् ?

(अ) चतुर्थी द्विवचनम् (ब) षष्ठी द्विवचनम्

(स) तृतीया द्विवचनम् (द) द्वितीया द्विवचनम्

(ii) 'नेस्त्रयः' अनेन सूत्रेण कः आदेशो भवति ?

(अ) त्रयस् आदेशः (ब) आकारादेशः

(स) कादेशः (द) हृद् आदेशः

(iii) सावसम्बुद्धौ परतः इन्हन्पूषार्यम्णामुपधायाः दीर्घः केन सूत्रेण भवति ?

(अ) तस्मान्नुडचि (ब) जहातेश्च

(स) सौ च (द) आ च हौ

(iv) विकल्पेन इकारादेशः केन सूत्रेण भवति ?

(अ) विभाषोदरे (ब) जहातेश्च

(स) गमः क्वौ (द) उद ईत्

(v) 'रुट' आगमः केन सूत्रेण भवति ?

(अ) बहुलं छन्दसि (ब) ठस्येकः

(स) औङ् आपः (द) शीङो रुट्

(vi) भस्य अकारस्य लोपः केन सूत्रेण भवति ?

(अ) अचः (ब) टेः

(स) राधो हिंसायाम् (द) ई हल्यघोः

(vii) केन सूत्रेण निष्ठायाम् इडागमो न भवति?

(अ) षट्चतुर्भ्यश्च (ब) पूङश्च

(स) श्वीदितो निष्ठायाम् (द) अञ्चेः पूजायाम्

२. सत्यासत्य-विवेचनं कुरुत- सत्यं कृते (✓), असत्यं कृते (☒) चिह्नं प्रदर्शयत- 5×1=5

(i) रेफषकाराभ्याम् उत्तरस्य नकारस्य णकारादेशो भवति एकस्मिन् पदे।

(ii) सदेः धातोर्लिटि परतः परस्य सकारस्य मूर्धन्यो भवति।

(iii) 'न मु ने' इति सूत्रस्य अमुना उदाहरणं नास्ति।

(iv) अङ्गस्याभ्यासस्य ह्रस्वो भवति।

(v) आण् नद्याः अनेन सूत्रेण आट् आगमः न भवति।

३. मञ्जूषायाः पदं चित्वा रिक्तस्थानानि पूरयत - (केवलं पञ्चानामेव) 5x1=5

(i) बहोः परस्य इष्ठन् इत्येतस्य ------ आगमो भवति।

(ii) अभ्यस्तादङ्गादुत्तरस्य प्रत्ययावयवस्य ------- 'अत्' आदेशो भवति।

(iii) युतवान् इत्युदाहरणं ------ इति सूत्रस्य अस्ति।

(iv) इन्द्रशब्दस्य परस्य अचामादेरचः स्थाने पूर्वसूत्रेण --------- भवति।

(v) दम्भे रङ्गस्य अचः स्थाने ------ भवति, चकारादीच्च सनि सकारादौ परतः।

(vi) अहो इत्यनेन युक्तं तिङन्तं नानुदात्तं भवति -------- विषये।

(vii) नशेः पदस्य वा ----- भवति।

**मञ्जूषा**

यिट्, वृद्धिर्न, श्रयुकः किति, झकारस्य स्थाने, पूजायाम्, इकारादेशः, कवर्गादेशो।

४. समुचितं मेलनं कुरुत- 5x1=5

| | |
|---|---|
| (i) इद् वृद्धौ | (क) छ्वोर्लोपः |
| (ii) राल्लोपः | (ख) शी आदेशः |
| (iii) औङ आपः | (ग) इकारादेशः |
| (iv) ऋतश्च संयोगादेः | (घ) ककारादेशः |
| (v) षढोः कः सि | (ङ) इडागमः |

५. पदच्छेद - विभक्तिवचनसहितं सूत्रार्थं लिखत - (पञ्चानामेव) 5x2=10

(i) पूर्वपदात् संज्ञायामगः।

(ii) सहेः साडः सः।

(iii) क्षियो दीर्घात्।

(iv) विभाषा वेष्टिचेष्ट्योः।

(v) घेर्ङिति।

(vi) रायो हलि।

(vii) संयोगादिश्च।

६. चत्वारि रूपाणि साधनीयानि- 5×4=20

(i) घानिष्यते

(ii) अजर्घाः

(iii) मातापितरौ

(iv) विश्वामित्रः

(v) शुचीकरोति

(vi) अचैषीत्

**खण्डः- 'ख' Section- 'B'** **३० अङ्काः**

## अपठितावबोधनम्

७. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् संस्कृतेन उत्तरत- 5

सायङ्काले अस्ताचलं प्रति गच्छन् भगवान् सूर्यः चिन्तितः अभवत् - "मयि गते सम्पूर्णः संसारः अन्धकारे निमग्नः भविष्यति। लोकानां व्यवहारः कथं चलिष्यति ? मां विना सर्वे जीवाः दुःखम् अनुभविष्यन्ति।" तस्य एतं भावं विज्ञाय एकः लघुदीपः निवेदितवान् - "भगवन् ! अलं चिन्तया। यद्यपि मम प्रकाशः क्षीणः तथापि जनानां सेवायाम् अहं यथाशक्ति स्वजीवनं समर्पयिष्यामि, कार्याणि च साधयिष्यामि।" प्रसङ्गोऽयं शिक्षयति यदस्माभिरपि स्वकर्तव्यस्य

निर्वाहो यथाशक्ति कर्तव्यः। कदापि एतन्न चिन्तनीयं यदहं लघुः एषः दीर्घः। मम कार्यं सुकरं तस्य कार्यं दुष्करमिति। यस्मिन् समाजे सर्वेजनाः प्रसन्नमनसा आत्मकर्तव्यं पालयन्ति सः समाजः सदैव उन्नतिम् अधिगच्छति। अतः आत्मकर्तव्यं सर्वोपरि स्यात्।

(i) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 2x½=1

(क) सम्पूर्णः संसारः कस्मिन् निमग्नो भविष्यति ?

(ख) सर्वे जीवाः किम्अनुभविष्यन्ति?

(ग) अस्माभिः कस्य निर्वाहः यथाशक्ति कर्तव्यः?

(ii) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नैकम्) 1×1=1

(क) अस्ताचलं प्रति गच्छन् सूर्यः किं चिन्तयति ?

(ख) सूर्यस्य भावं विज्ञाय लघुदीपः किं निवेदितवान् ?

(iii) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत - 1×1=1

(iv) यथानिर्देशम् उत्तरत– (केवलं प्रश्नद्वयम्) 2×1=2

(क) "सूर्यः' इति कर्तृपदस्य क्रियापदं चिनुत -

(अ) भविष्यति (ब) अभवत्

(स) कर्तव्यः (द) अधिगच्छति

(ख) 'सुकरम्' इति पदस्य विलोमपदं चिनुत -

(अ) दुष्करम् (ब) स्वजीवनम्

(स) आत्मकर्तव्यम् (द) अलम्

(ग) 'ज्ञात्वा' इति पदस्य पर्यायपदं चिनुत-

(अ) निमग्नः (ब) कर्तव्यः

(स) विज्ञाय (द) सदैव


(घ) 'भगवान् 'इति विशेषणपदस्य विशेष्यपदं चिनुत-

(अ) व्यवहारः (ब) सूर्यः

(स) लघुदीपः (द) समाजः

## रचनात्मकं कार्यम्

८. मञ्जूषा-प्रदत्तशब्दानां साहाय्येन अधः प्रदत्तं चित्रं दृष्ट्वा चत्वारि वाक्यानि संस्कृतेन लिखत- 4×1=4




**मञ्जूषा**

पठन्ति, आगच्छन्ति, पत्रिकाः, पत्रालयः, पत्राणि, दूरात, आसन्दिकायाम्, लिखन्ति, उपविष्टाः, पत्रव्यवहारः, पत्रवाहकः, डाक–अधीक्षकः ।

**अथवा**

अधः प्रदत्तः विषयमाधृत्य पञ्चविंशतितः त्रिंशच्छब्दपरिमितैः शब्दैः अनुच्छेदमेकं मुञ्जूषायां प्रदत्तशब्दानां सहायतया लिखत -

**'विषयः – दीपावलिः'**

**मञ्जूषा**

कार्तिक मासस्य, दीपानाम् अवलिः, अमावस्यायाम्, प्रसन्नतया, उत्सवः, मान्यते, लक्ष्मीपूजनं, जनाः, सायंकाले, कुर्वन्ति, मिष्टान्नम्, स्वच्छताभियानम्, गृहेषु, भवति, खादन्ति ।

९. अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत - 4

भोजविषयिणीम् इमां भविष्यवाणीं निशम्य मुञ्जो विच्छायवदनोऽभूत्। ततो राजा ब्राह्मणं सम्प्रेष्य निशीथे शयनमासाद्य व्यचिन्तयत्- यदि राजलक्ष्मीः भोजकुमारं गमिष्यति, तदाहं जीवन्नपि मृतः। ततश्च अभुक्त एव सः एकाकी किमपि चिन्तयित्वा बंगदेशाधीश्वरं वत्सराजं समाकारितवान्, वत्सराजश्च धारानगरीं सम्प्राप्य राजानं प्रणिपत्य उपविष्टः।

राजा च सौधं निर्जनं विधाय वत्सराजं प्राह- त्वया भोजो भुवनेश्वरी-विपिने रात्रौ हन्तव्यः, छिन्नं च तस्य शिरः मत्पार्श्वे अन्तःपुरम् आनेतव्यम्। एतन्निशम्य वत्सराजः उत्थाय नृपं नत्वा प्रावोचत्- यद्यपि देवादेशः प्रमाणम्, पुनरपि किञ्चिद् वक्तुकामोऽस्मि, सापराधमपि मे वचः क्षन्तव्यम्।

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 2x½=1

(क) भविष्यवाणीं निशम्य मुञ्जः कीदृशःअभवत् ?

(ख) वत्सराजः कुत्र सम्प्राप्य राजानं प्रणिपत्य उपविष्टः ?

(ग) मे किं क्षन्तव्यम् ?

(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नैकम्) 1×1=1

(क) राजा निशीथे शयनमासाद्य किं व्यचिन्तयत् ?

(ख) वत्सराजः उत्थाय नृपं नत्वा किं प्रावोचत् ?

(इ) यथानिर्देशम् उत्तरत – (केवलं प्रश्नद्वयम्) 2×1=2

(क) 'श्रुत्वा' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

(ख) 'दिने' इति पदस्य विलोमपदं अत्र किं प्रयुक्तम् ?

(ग) 'राजलक्ष्मीः' इति कर्तृपदस्य क्रियापदं किं प्रयुक्तम् ?

१०. अधोलिखितं श्लोकं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत - 4

गुणी गुणं वेत्ति न वेत्ति निर्गुणो, बली बलं वेत्ति न वेत्ति निर्बलः।
पिको वसन्तस्य गुणं न वायसः, करी च सिंहस्य बलं न मूषकः॥

(अ) एकपदेन उत्तरत - 2x½=1

(क) गुणं कः वेत्ति ?

(ख) कस्य गुणं पिकः वेत्ति ?

(आ) पूर्णवाक्येन उत्तरत (केवलं प्रश्नैकम्) 1×1=1

(क) कः बलं वेत्ति कः च न वेत्ति ?

(ख) करी कस्य बलं जानाति ?

(इ) यथानिर्देशम् उत्तरत – (केवलं प्रश्नद्वयम्) 2×1=2

(क) 'कोकिलः' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

(ख) 'बलहीनः' इतिपदस्य विलोमपदं किं प्रयुक्तम् ?

(ग) 'गुणी' इति कर्तृपदस्य क्रियापदं किं प्रयुक्तम् ?

११. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारं मञ्जूषायाः शुद्धम् अर्थं चित्वा लिखत- 1×4=4

(i) तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता।

(ii) निरीक्षते केलिवनं प्रविश्य क्रमेलकः कण्टकजालमेव।

(iii) त्यागाय सम्भृतार्थानां सत्याय मितभाषिणाम्।

(iv) मत्कृते आवश्यकता नास्ति अवलम्बनस्य।

| **मञ्जूषा** |
|---|
| उष्ट्रः, साहाय्यस्य, धैर्यम्, अल्पभाषिणाम्। |

## संस्कृत साहित्य-परिचयः

१२. अधोलिखितानां प्रश्नानामुत्तराणि लिखत - (केवलं प्रश्नत्रयम्) 3×1=3

(i) बाणभट्टस्य रचना --------अस्ति। (रघुवंशम् / कादम्बरी / वासवदत्ता)

(ii) वासवदत्ता कस्य कवेः रचना ? (कालिदासस्य / दण्डिनः / सुबन्धोः)

(iii) शिवराजविजयम् -------- रचना अस्ति। (दण्डिनः / अम्बिकादत्तव्यासस्य / भारवेः)

(iv) नलचम्पूः काव्यस्य रचयिता -------- अस्ति। (त्रिविक्रमभट्टः / सोमप्रभासूरिः / भोजः)

१३. यथानिर्देशं प्रश्नानाम् उत्तराणि लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

(i) काव्येषु ------------ रम्यम् । (चम्पूः / नाटकम् / गद्यम्)

(ii) नाट्यशास्त्रस्य लेखकः --------- अस्ति । (भरतमुनिः / बाणभट्टः / कालिदासः)

(iii) नाटकस्य आरम्भे ------- भवति । (भरतवाक्यम् / नान्दी / उपसंहारः)

(iv) रूपकस्य -------- भेदाः सन्ति । (पञ्च / अष्ट / दश)

(v) नाटके हास्यं -------- उत्पन्नं करोति । (नायकः / नायिका / विदूषकः)

१४. समुचितं मेलनं कुरुत - 4×½=2

| | |
|---|---|
| (i) छन्दःशास्त्रम् | (क) अमरसिंहः |
| (ii) अष्टाध्यायी | (ख) नलिनी शुक्ला |
| (iii) अमरकोषः | (ग) पिङ्गलाचार्यः |
| (iv) वाणी शतकम् | (घ) पाणिनिः |